# संस्कृतवार्ता:

दिनाङ्क : 30/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- कर्णाटके कांग्रेस दलस्य नेतृत्वे विधायक दलस्य नेतु: चयनाय उपवेशनम् प्रवर्तते।
- म्यांमारस्य राष्ट्रपतिः मिन आंग ह्लाइंग इत्यसौ अद्य पञ्चदिवसीय भारत-यात्रायै बिहारस्य गयां सम्प्राप्तः। तेन महाबोधि मन्दिरस्य दर्शनम् कृतम्।
- ऋतुविज्ञान-विभागेन उक्तम् वायुमण्डलीयपरिस्थितिभिः अनुमीयते यत् दक्षिणपश्चिमप्रावृट् आगामिषु चतुर्-पञ्चदिनेषु केरलस्य तमिलनाडोः च कतिपय-भागेषु आगमिष्यति।
- अमेरिकायाः रक्षा मंत्री पीट-हेगसेथ इत्यसौ अवोचत् यत् यदि सन्धेः प्रयासः विफलाः भविष्यन्ति चेत् अमेरिकायाः सेना ईरानं विरुध्य सैन्य-कार्याचरणं विधातुं पूर्णरूपेण सन्नद्धा वर्तते।
- बैडमिण्टन् क्रीडायां सिंगापुर ओपन टूर्नामेंट इति स्पर्धायां भारतस्य सात्विक सांईराज रंकी रेड्डी, चिराग शैट्टी इत्यनयो: युगलं निर्णायकचक्रे प्रविष्टम्।

---------------------------------------

<u>कर्णाटके उपवेशनम्</u>

कर्णाटके कांग्रेस दलस्य नेतृत्वे विधायक-दलस्य नेतु: चयनाय उपवेशनम् प्रवर्तते। निवर्तमान मुख्यमन्त्रिण: सिद्धारमैया वर्यस्य त्यागपत्रं राज्यपालेन थावर चन्द गहलोतेन पूर्व-मेव स्वीकृतम्। उपवेशनस्य अनन्तरम् अखिल भारतीय कांग्रस कमेटी इत्यस्य महासचिव: रणदीप सिंह सुरजेवाला वार्ताहरान् सम्बोधयिस्यति। अस्माकं वार्ताहरेण सूचितं यत् अस्मिन् उपवेशने डी.के. शिवकुमार: औपचारिक-रूपेण विधायक-दलस्य नेता चयनितो भविष्यति। इत: पूर्वम् अपि डी. के. शिवकुमार: राज्यपालम्- अमिलत्। उपवेशनस्य अनन्तरम् प्रशासन रचनायै अपि स: राज्यपालाय प्रतिवदेनम् दास्यति।

----------------------------------------

## वैष्णव नौएड़ा

इलैक्ट्रोनिक्स-सूचना प्रौद्योगिकी मन्त्री अश्विनी वैष्णव: अद्य नोएड़ाया: सूरज-पुरस्थितस्य लोहुम इति समवायस्य भ्रमणम् अकरोत्। अयं समवाय: महत्वपूर्ण-खनिनाम् उन्नतसामग्रीणां च उत्पादनं विदधाति। अत्रावसरे श्रीवैष्णव: अवोचत-यत् लिथियम बैटरी स्थायी चुम्बक इत्येतौ आधुनिक-प्रौद्योगिक्यां महत्वपूर्णां भूमिकां निभालयत:। प्रधानमन्त्रिण: नरेन्द्रमोदिन: परिकल्पना वर्तते यत् एतेषां निर्माणं भारते स्यात्। एतेषां प्रौद्योगिक्य: विकास: स्वदेश-स्तरे भवेत्। श्री वैष्णवेन उक्तं यत् अस्या: परिकल्पनाया: अनुरूपं लोहुम नामकेन समावायेन सफलतापूर्वंक जटिल-प्रौद्योगिकी विकसिता।

----------------------------------------

## म्यांमारस्य राष्ट्रपतिः

म्यांमारस्य राष्ट्रपतिः मिन आंग ह्लाइंग इत्यसौ अद्य पञ्चदिवसीय भारत-यात्रायै बिहारस्य गयां सम्प्राप्तः। तेन बोधगया-स्थितस्य विश्व-प्रसिद्धस्य महाबोधि-मन्दिरस्य दर्शनं विहितम्। राष्ट्रपतिना तत्र बोधिवृक्षस्य अधः प्रार्थना अपि कृता। अत्रावसरे म्यांमारस्य राष्ट्रपतिना बकराउर स्थिते ऐतिहासिके सुजातामन्दिरे शिरं नत्वा बोधगया-स्थितस्य बर्मी मठस्य यात्रा कृता। राष्ट्रपतिना सह वरिष्ठाधिकारिणः बौद्धप्रतिनिधियः उच्चस्तरीय-प्रतिनिधिमंडलं चापि सन्ति।

----------------------------------------

## केरले प्रावृट्

ऋतुविज्ञान-विभागेन उक्तम् वायुमण्डलीयपरिस्थितिभिः अनुमीयते यत् दक्षिणपश्चिमप्रावृट् आगामिषु चतुर्-पञ्चदिनेषु केरलस्य तमिलनाडोः च कतिपय-भागेषु आगमिष्यति। अरबसागरे बङ्गलखात्यां लक्षद्वीपे कन्याकुमार्यां च प्रावृट् अग्रे समेधते। ऋतुविज्ञानविभागेन केरलस्य अष्टजनपदेषु अद्य प्रचण्डवृष्टेः पूर्वानुमानं विधाय पीतवर्णसचेतना

प्रसारिता। ऋतोः प्रतिकूलता कारणेन जून-मासस्य तृतीयदिनं यावत् मत्स्यजीविनः केरल-लक्षद्वीप-तटयोः समुद्रे उद्यमं न कुर्वन्तु इति परामर्शः अपि प्रदत्तः।

----------------------------------------

## सिन्दूराभियानम्

सेना प्रमुख: जनरल उपेन्द्रद्विवेदी अवोचत् यत् भारतीय सशस्त्र बलानि उच्चस्तरीय सतर्कतायां विद्यन्ते। आवश्यकता जाते सति ऑपरेशन सिन्दूर-टू **प्वाइंट ओ** इति सिन्दूराभियानस्य द्वितीय-चरणाय सन्नद्धानि सन्ति। पुणे नगरस्य खडकवासला स्थितायां राष्ट्रिय रक्षाकादम्यां स्नातकानां सार्धैकशतमस्य दलस्य पासिंग आउट परेड इति प्रयाणं सम्बोधयता जनरल द्विवेदिना उक्तं यत् सिन्दूराभियाने दृढ-सङ्कल्पेन प्रत्युत्तरप्रदानस्य क्षमता प्रदर्शिता। तेनेक्तं यत् एतत् अभियानम् इदानीम् अपि सन्ततं प्रवर्तते।

जनरल द्विवेदी अवोचत् यत् सिन्दूराभियाने भारतीय सैन्य बलानां मध्ये तारतम्यम् अवलोकितम्। सममेव वयं भविष्यकालाय आत्मानं सन्नद्धं कुर्महे। सेना प्रमुखेण स्नातका: व्यवसायिक-नेतृत्वस्य राष्ट्र सेवाया: च सर्वोच्च-मानकान् यथावत् प्रवतितुर्म् आकारिता:।

----------------------------------------

## मन की बात

प्रधानमंत्री नरेन्द्र मोदी श्वः प्रातः एकादश वादने आकाशवाण्याः मन की बात कार्यक्रमे जनैः साकम् स्वविचारान् प्रकटयिष्यति। कार्यक्रमोऽयं मासिक रेडियो कार्यक्रमस्य चतुश्चत्रिंशदुत्तरैकशत-तमः प्रभागः वर्तते। कार्यक्रमोयं आकाशवाणीदूरदर्शनयोः अन्तर्जालीयपटले प्रसारयिष्यते। एतदतिरिच्य कार्यक्रमोयं आकाशवाण्याः अन्तर्जालीय-वेबफलकं समेत्य न्यूज ऑन ए आई आर मोबाइल एप इति तन्त्रांशे अपि उपलब्धः भविष्यति ।

----------------------------------------

## अनिलचौहानः

प्रमुखः रक्षाध्यक्षः जनरल अनिलचौहानः अद्य  नव-दिल्ली-स्थे राष्ट्रिय-समर-स्मारके सैन्यत्रयेण प्रदत्तेन गार्ड ऑफ ऑनर इति सम्मानेन सह सैन्य-सेवाभ्यः निवृत्तिं  स्व्यकरोत्। अयं समारोहः देशस्य सर्वोच्च-सैन्याधिकारि-रूपेण तदीय विशिष्ट-कार्यकालस्य समापनस्य प्रतीकः अवर्तत्। समर-स्मारके पुष्पांजलिं समर्प्य जनरल चौहानेन उक्तं यत् सैन्यत्रयस्य गार्ड ऑफ ऑनर इति सम्मानेन सह सेवानिवृत्तः तस्मै अन्तं सम्मानप्रदं वर्तते। जनरल अनिल-चौहानः गतशताब्दस्य एकाशीतितमे वर्षे भारतीय-सेनायां सेवाम् अवाप्य चत्वारिंशदाधिक-वर्षेषु देशसेवायां महत्त्वपूर्ण-पदेषु कार्यम् अकरोत्। लेफ्टिनेंट-जनरल-एन..एस.राजा सुब्रमणिः जनरल-अनिसचौहानस्य स्थानं स्वीकरिष्यति।

-----------------------------------------

## अमेरिकायाः रक्षा मंत्री

अमेरिकायाः रक्षा मंत्री पीट-हेगसेथ इत्यसौ अवोचत् यत् यदि सन्धेः प्रयासा: विफलाः भविष्यन्ति चेत् अमेरिकायाः सेना ईरानं विरुध्य  सैन्य-कार्याचरणं विधातुं पूर्णरूपेण सन्नद्धा वर्तते।

-----------------------------------------

## किरेन रिजिजू

अल्पसङ्ख्यककार्यमन्त्री किरेन रिजिजूः अद्य सूचितवान् यत् प्रथमवारं भारतीय-हज-मिशन-संस्थया हज-समन्वयस्य सञ्चारस्य च उत्कृष्टताय ै सउदी-हज-उमराह-मन्त्रालययोः प्रतिष्ठितौ लाब्बाव्युम-पुरस्कारौ प्राप्तौ। सामाजिक-संचार-माध्यम ेन श्री रिजिजूः अकथयत् यत् षड्विंशत्यधिक-द्विसहस्त्रतम-वर्षस्य हज-यात्रायाः मुख्य-चरणस्य सफलता अल्पसङ्ख्यक-कार्यमन्त्रालयस्य, भारत ीय-हज-समित्याः सउदी-अरब-देश े भारत ीय-राजदूतस्य नेतृत्वे भारतीय-हज-मिशन इत्यस्य जेद्दाह-नगरस्य महाव्यवस्थापकस्य च मध्ये अविच्छिन्न-समन्वयं प्रतिबिम्बयति इति।

-----------------------------------------

## बैडमिंटन्

बैडमिण्टन् क्रीडायां सिंगापुर ओपन टूर्नामेंट इति स्पर्धायां भारतस्य सात्विक सांईराज रंकी रेड्डी, चिराग शैट्टी इत्यनयोः युगलं निर्णायकचक्रे प्रविष्टम्। उपान्त्यचक्रे भारतीय दलेन दक्षिण कोरिया दलं पराजितम्।

---------------------------------------

## महिला क्रिकेट्

महिलानाम् अन्ताराष्ट्रिय-क्रिकेट-क्रीडायाम् अद्य भारत इङ्ग्लैण्ड-दलयोः द्वितीया विंशतिम् प्रतिविंशतिः स्पर्धा ब्रिस्टल इत्यत्र भविष्यति। इयं स्पर्धा भारतीय-समयानुसारेण सायं सप्तवादने आरप्स्यते।

।। इति वार्ता: ।।